# फ्लैण्डरमहोदयस्य

# “अन्तःक्रियाविश्लेषणम्”

# अन्तःक्रियाविश्लेषणस्य अर्थः

क्रमबद्धनिरीक्षणप्रविधिना शिक्षकक्रियायाः शिक्षणव्यवहाराणाञ्च विश्लेषणं क्रियते।

प्रभाविशिक्षणनिर्धारणार्थं, शिक्षकस्य कक्षाव्यवहारे परिष्कारार्थं, शिक्षणक्रियाणां विश्लेषणं कृत्वा तत्र कथं परिष्कारं विधाय

# अन्तःक्रियावर्गप्रणाली

फ्लैण्डरवर्येण 1950 तमे वर्षे एतस्य विधेः निर्माणं शिक्षकप्रभावस्य छात्रनिष्पत्तेः च अनुसन्धानार्थं कृतमासीत्। एषः प्रविधिः विशेषतया कक्ष्यायाः शाब्दिकव्यवहारस्य कक्षागतसम्प्रेषणस्य च कृते प्रयुज्यते। छात्रशिक्षकयोर्मध्ये अशाब्दिकव्यवहाराणामपेक्षया शाब्दिकव्यवहाराणां प्राधान्यं वर्तते। फ्लैण्डरमहाभागस्य अभिमतानुसारं कक्षायाः शाब्दिकव्यवहारः सम्पूर्णकक्षाव्यवहारस्य

# अन्तःक्रियावर्गप्रणाली

फ्लैण्डरमहोदयेन स्वसहयोगिभिः सह मिनेसोटाविश्वविद्यालये (1955-60) एतस्याः वर्गप्रणाल्याः विकासः कृतः। एतस्य प्रविधेः साहाय्येन क्षणाभ्यन्तरे जायमानायाः घटनायाः निरीक्षणं क्रमबद्धरूपेण कर्तुं शक्यते। एषः प्रविधिः वस्तुनिष्ठः वैज्ञानिकश्च निरीक्षणप्रविधिः इति मन्यते।

# मूलधारणाः

फ्लैण्डरमहोदयस्य दशवर्गप्रविधीनाम् अधोलिखिताः मूलधारणाः भवन्ति –

- छात्रेषु शिक्षकस्य प्रभावः अधिकः इति कारणतः छात्रस्य व्यवहारः शिक्षकस्य व्यवहारेण प्रभावितो भवति।
- विशेषतया शिक्षकस्य कक्षागतव्यवहारः छात्रान् बहु प्रभावयति।
- सामान्यतया कक्षाशिक्षणे शाब्दिकव्यवहारस्य प्राधान्यं भवति।

- कक्षाशिक्षणे यद्यपि शाब्दिकव्यवहारेण सह अशाब्दिकव्यवहारोऽपि जायते, तथापि शाब्दिक- व्यवहारस्य विश्वसनीयता अधिका भवति। अतः अयमेव व्यवहारः सम्पूर्व्यवहारस्य प्रातिनिध्यं करोति।
- शिक्षणप्रक्रियायां छात्रशिक्षकयोर्मध्ये जायमानसम्बन्धः एकं महत्त्वपूर्णतत्त्वम्।
- शिक्षकस्य लोकतान्त्रिकदृष्टिकोणं छात्राः आधिक्येन अभिलसन्ति।

- कक्षायाः लोकतान्त्रिकवातावरणं छात्राणाम् उच्चस्तरीयनिष्पत्तये प्रोत्साहयति।
- एषः प्रविधिः शिक्षकस्य व्यवहारपरिष्कारार्थं समुचितपरिवर्तनार्थं च प्रतिपुष्टिरूपेण भवितुम् अर्हति।
- अधिगमप्रक्रियायां कक्षायाः वातावरणं महत्त्वपूर्णं स्थानं निर्वहति।

# उद्देश्या
# नि

- शिक्षकवैशिष्ट्यानाम् अध्ययनम्।
- निरीक्षणमाध्यमेन शिक्षकव्यवहाराणाम् अध्ययनम्
- अवबोधस्तरे जायमानव्यवहारप्रकृतेः अध्ययनम्।
- शिक्षकस्य सामाजिके संवेगात्मके च परिवेशे अन्तःक्रियायाः विश्लेषणम्।
- छात्रशिक्षकयोः व्यवहाराध्ययनम्।

# फ्लैण्डर्वर्यस्य अन्तःक्रियाविश्लेषणप्रणाली

- शिक्षककथनम् (Teacher's talk)
- छात्रकथनम् (Pupil's talk)
- मौनं विभ्रान्तिः वा (Silence or Confusion)

# शिक्षककथनम्

- विचारस्वीकृतिः (Accepts feeling)
- प्रशंसाप्रोत्साहनञ्च (Praises & Encourages)
- स्वीकृतिः अथवा छात्रविचाराणां प्रयोगः (Accepts or uses ideas of Student)

- प्रश्नकरणम् (Ask question)
- व्याख्यानम् (Lecturing)
- निर्देशप्रदानम् (Giving direction)
- समालोचनम् अधिकारप्रदर्शनञ्च (Criticizing & Showing authority)

# छात्रकथनम्

- छात्रकथनानुक्रिया (Pupil's talk response)
- छात्रकथनोपक्रमः (Pupil's talk initiation)

# मौनं विभ्रान्तिः वा

- कक्षायां कदाचित् सर्वे छात्राः कदाचित् अध्यापको वा सम्भाषन्ते। कदाचित् कक्षायां पूर्णतया शान्तिः अपि भवति। यदा सर्वे छात्राः युगपत् कक्षायां भाषन्ते, तदा कक्षायाः अव्यवस्था सञ्जायते, येन न कश्चित् किमपि अवगन्तुं शक्नोति अथवा किञ्चित् कालपर्यन्तं कक्षाकार्यं मौनं तिष्ठति।

# प्रक्रिया

- अङ्कनप्रक्रिया (Encoding procedure)
- अर्थापनप्रक्रिया (Decoding procedure)

# वैशिष्ट्यानि

- कक्षायामेषः विधिः शिक्षकव्यवहारं वस्तुनिष्ठरूपेण निरीक्षते।
- अत्र प्रतिपुष्टेः व्यवस्था वर्तते।
- कक्षाशिक्षणार्थं मूल्याङ्कनस्य एषः विधिः वास्तविकः विश्वसनीयश्च भवति।
- सूक्ष्मशिक्षणे एतस्य प्रयोगः सहायकप्रविधिरूपेण क्रियते।

- शिक्षणाभ्याससमये अनेन विधिना छात्राध्यापकेभ्यः अपेक्षितशिक्षणव्यवहाराणां ज्ञानं प्रदातुं शक्यते।
- अस्यां प्रणाल्यां शिक्षकस्य शिक्षणविश्लेषणं क्रियते, येन शिक्षकः स्वमूल्याङ्कनं कृत्वा आत्मनः गुणादोषान् विविच्य दोषान् परिष्कर्तुमर्हति।
- एषा प्रणाली शिक्षणस्य सम्प्रत्ययं स्पष्टयति, येन शिक्षकः स्वव्यवहारेषु परिवर्तनं सम्पाद्य शिक्षणं प्रभावशालि करोति।

# सीमा

- अनेन विधिना केवलं शाब्दिकव्यवहाराणामेव अध्ययनं क्रियते, न तु अशाब्दिकव्यवहाराणाम्।
- अस्मिन् विधौ पाठ्यक्रमे, पाठ्यवस्तूनि, शिक्षणबिन्दुषु, प्रकरणे वा किञ्चिदपि अवधानं न दीयते।
- अत्र छात्रकथने अधिकमवधानं न दीयते। किन्तु शिक्षकथने एव अधिकावधानं दीयते। किन्तु एतत् अनुचितम्।

- एषः विधिः कक्षाव्यवहाराणां केवलं दशवर्गेषु एव अध्ययनं करोति, येन व्यवहाराः पूर्णतया परिसीमिताः भवन्ति। अनेके व्यवहाराः अस्मिन् विधौ अवलोकिताः न भवन्ति।

- अत्र प्रशिक्षितनिरीक्षकाणाम् आवश्यकता भवति।

- अस्य विधेः प्रयोगार्थम् अधिककालः अधिका शक्तिश्च अपेक्षते।


धन्यवाद :